MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# A Critical Appraisal of the Debate on the Distinctness of the Self from the Body in the *Nyāyabhāṣya* and *Nyāyavārttika*

## आत्मनः देहव्यतिरिक्तत्वप्रतिष्ठायां न्यायभाष्यवार्त्तिकवादविवेकः

***Dr. Debasish Mishra***

*Assistant Professor, Dept. of Sanskrit,*
*Vivekananda Satavarshiki Mahavidyalaya,*
*Jhargram, West Bengal, India.*
*Email: mishrash79@gmail.com*
*Page No: 66-72*

***Abstract:*** *Indian philosophy is broadly classified into two traditions: orthodox (Āstika) and heterodox (Nāstika). Among the orthodox schools, the Nyāya philosophy holds a pre-eminent position. In this epistemic, knowable-oriented (prameya-pradhāna) system, knowable objects (prameya) are categorized into general (sāmānya) and specific (viśeṣa). In the second aphorism of the Nyāyasūtra, Sage Gautama enumerates twelve specific objects of knowledge, beginning with the Self (Ātman). Direct realization of these twelve entities constitutes the prerequisite for liberation (Mokṣa).*

*Among these, the Self is both the foremost and the principal object of knowledge. Liberation is attained exclusively through the cessation of erroneous knowledge (mithyā-jñāna) concerning the Self. Consequently, a critical examination (parīkṣā) of the Self is imperative to achieve valid knowledge (yathārtha-jñāna), as true cognition emerges only through systematic critical inquiry.*

*In the third chapter of the Nyāyasūtra, Sage Gautama extensively deliberates upon the nature of the Self, where, amidst various inquiries, he addresses the fundamental doctrine of the distinctness of the Self from the physical body (ātmano deha-vyatiriktatvam). Although the two seminal exegetical traditions—the Bhāṣya (by Vātsyāyana) and the Vārttika (by Uddyotakara)—are based on Gautama's foundational aphorisms and share significant commonalities, distinct dialectical nuances and differences are also evident between them. In this paper, a critical comparative analysis has been undertaken to examine the perspectives of both the Bhāṣya and the Vārttika in establishing the ontological distinction of the Self from the physical body.*

***Keywords:*** *Sattva, Nairātmyavādin, Anātmavādin, Pātaka, Dehendriyādi-saṅghāta, Varṣātapa-sambandha, Anucchitti-dharma*

**उपोद्घातः—** कस्मिंश्चित् भारतीयदर्शने देहभिन्नरूपेण आत्मा न स्वीकृत:। तेषां नये देह आत्मा एव देहभिन्नरूपेण आत्मन: किमपि अस्तित्वं नास्ति।[1] तथा च अपरभारतीयदर्शने विज्ञानानां प्रवाह एव आत्मा इति प्रतिष्ठित:। तेषां सर्वेषां मतखण्डनार्थं महर्षिणा न्यायसूत्रस्य तृतीये अध्याये सूत्रत्रयमुल्लिखितम्। तात्पर्य्यटीकाकारेण वाचस्पतिमिश्रेण अस्य प्रकरणस्य नाम "शरीरव्यतिरेकात्मप्रकरणम्" इति कृतम्। अस्मिन् प्रकरणे महर्षि: गौतम: युक्तिद्वारा शरीरव्यतिरिक्तरूपेण आत्मप्रतिष्ठां कृतवान्। तत्र तेन सूत्रं कृतं "शरीरदाहे पातकाभावात्।"[2] इति। अर्थात् यदि शरीरमात्मा स्यात् तर्हि शुभाशुभकर्मजन्यपुण्यपापादि शरीरे उत्पन्नं भवेत्। तथा शरीरनाशे तेषां शरीराश्रितपापपुण्यादीनां नाशोऽपि भवेत्। अत: यदि शरीरनाशे पापपुण्यादीनां नाशो भवेत् तर्हि पापपुण्यादिजन्यफलभोग: कदापि न सम्भवेत्। तर्हि सर्वे जीवद्दशायाम् अतीवमात्रेण पापं कुर्युः। यत: तेषां पापानां फलभोग: कदापि न सम्भवेत्। अत: कोऽपि कदापि पापेभ्यो न विभेति।

अत्र भाष्यकारेण वात्स्यायनेन अस्य प्रकरणस्य पृथक् नामकरणं न कृतम्। अत्र स पूर्वपक्षिरूपेण नैरात्म्यवादिबौद्धसम्प्रदायस्य मतखण्डनं कृतवान्। बौद्धानां मते देहादिसंघात एव आत्मा, तद्व्यतिरिक्तरूपेण कोऽपि आत्मा नास्ति। अस्मिन् सूत्रे शरीरशब्दस्यार्थो खलु देहेन्द्रियबुद्धिसुखदु:खरूपसंघात एव।[3] तथाहि अस्मिन् सूत्रे दाहशब्दस्यार्थ: नाश:, तथा पातकमिति शब्दस्यार्थ: खलु पापम्। तस्याभाव: अर्थात् पापपुण्यादिना सह कर्त्तु: सम्बन्धो नास्ति परन्तु अकर्त्तु: सम्बन्धो जायते।[4] प्राणिहिंसा बौद्धदर्शनेऽपि पापरूपेण स्वीकृत:। परन्तु बौद्धदर्शने देहादिसंघात आत्मरूपेण स्वीकृत:। देहादिसंघातस्य

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

प्रवाह एव आत्मा, तस्मिन् प्रवाहे एकदेहादिसंघातो विनश्यति तदा अपरदेहादिसंघातस्य उत्पत्तिर्भवति। यतो बौद्धनये सर्वं वस्तु क्षणिकम् अर्थात् वस्तुमात्रम् एकक्षणं तिष्ठति, अत आत्मा अपि क्षणिकम्। अत उत्पन्नविनाशविशिष्टः देहादिसंघातप्रवाहः न तु एकपदार्थविशिष्टः। अर्थात् तस्मिन् प्रवाहे विभिन्नाः पदार्थाः सन्ति। यतो देहादिसंघातो न संघातान्तर्गतव्यष्टिव्यतिरिक्तः अपरः कश्चित् पदार्थः। यदि देहादिसंघातः देहादिव्यष्टिव्यतिरिक्तः कोऽपि पदार्थः भवेत् तर्हि बौद्धस्वीकृतस्य सिद्धान्तस्य हानिर्भवेत्। पुनः यदि बौद्धाः स्वीकुर्वन्ति देहादिसंघातविशिष्टप्रवाहे अनेकाः पदार्थाः सन्तीति, तर्हि तस्मिन् प्रवाहे यो देहादिसंघातविशिष्ट आत्मा कार्यं करोति तस्य कदापि फलभोगो न सम्भवति, यतः क्षणिकत्वाद् कार्यादनन्तरं स देहादिसंघातविशिष्ट आत्मा विनश्यति। अतो देहादिसंघातविशिष्टो य आत्मा प्राणिहिंसाजनितं पापं करोति, स देहादिसंघातविशिष्ट आत्मा पापस्य फलभोगं न करोति। यतः पापं कृत्वा स आत्मा विनश्यति तथाहि पूर्वात्मकृतस्य पापस्य फलभोगं करोति पश्चात् उत्पन्नो देहादिसंघातविशिष्ट आत्मा, परन्तु स आत्मा प्राणिहिंसाजनितपापं न कृतवान्। अतः कृतहानिः तथा अकृताभ्यागमः चेति दोषद्वयं भवेत्। य एव आत्मा पापं कृतवान् स न फलं भुनक्ति। अतः कृतफलस्य हानिर्भवति, पुनः य एव आत्मा पापं न कृतवान् स पापस्य फलं प्राप्नोति। अनेन अकृतस्य अभ्यागमो भवति। तथाहि यदि देहादिसंघात एव सत्त्वम्[5] अर्थात् आत्मा भवेत् तर्हि तस्य आत्मन उत्पत्तिनाशौ भवेताम्। अतः मुक्तिलाभार्थं ब्रह्मचर्य्यादिपालनमपि व्यर्थं भवेत्। देहादिविनाशे तद्गतधर्माधर्मयोः अपि विनाशो भवति। यदि एवं भवेत् तर्हि पुनर्जन्मनः कापि सम्भावना नास्ति। तथा मुक्तये कर्म्मानुष्ठानमपि व्यर्थं भवेत्। परन्तु बौद्धाः मुक्तये कर्मानुष्ठानं कुर्वन्ति।

अत्र बौद्धस्य मतमिदं यद्यपि प्रतिक्षणं देहादिसंघातस्य प्रत्येकं पदार्थस्य विनाशो भवति तथापि तस्य विनाशे आमुक्तेः तत्सदृशदार्थस्य उत्पत्तिर्भवति। स एव सन्तानप्रवाह इति शब्देनोच्यते। अर्थात् आमुक्तेः संघातसन्तानप्रवाहः तिष्ठति, बोद्धनये स एव आत्मा। आमुक्तेः तस्य अस्तित्वं तिष्ठति। अतो मुक्त्यर्थं कर्म्मानुष्ठानं न व्यर्थं भवेत्।

अत्र नैयायिकेन उक्तं देहादिसंघातसन्तानप्रवाहो न देहादिव्यष्टिव्यतिरिक्तः कोऽपि अपरः पदार्थः। यदि देहादिव्यष्टिव्यतिरिक्तापरपदार्थरूपेण देहादिसंघातसन्तानप्रवाहः स्वीक्रियते तर्हि पृथक् आत्मा एव सिध्यते। तथा च देहादिसंघातान्तर्गतस्य प्रतिपदार्थस्य यदि प्रतिक्षणं विनाशो भवति तर्हि देहादिसंघातः अपि कदापि स्थायिरूपेण न तिष्ठेत्। तथाहि यदि देहादिसंघातरूपेण आत्मा स्वीक्रियते, तर्हि तस्य आत्मन उत्पत्तिविनाशौ अपि स्वीकर्त्तव्यौ। तर्हि देहादिसंघातविशिष्टस्य आत्मनो विनाशे तस्य कर्म्मजन्यधर्माधर्मयोर्पि विनाशो भवति। तर्हि आत्मनः पुनर्जन्म स्वभावादेव भवति न तु कर्म्मजन्यरूपेण।

अत्र वार्त्तिककारः भाष्यकारेण बौद्धमतखण्डनविषये यदेवोक्तं तस्य समर्थनं कृतवान्। अर्थात् यदि बोद्धाः शरीरव्यतिरिक्तरूपेण कश्चित् स्थायिचेतनमात्मानं न स्वीकुर्वन्ति तर्हि कृतप्रणाशादिदोषो भवति। बौद्धनये सर्वं क्षणिकत्वात् पापपुण्यादिशाश्वतनियमाः खलु व्यर्थाः भवेयुः। यतः पापादीनां भोक्ता कोऽपि नास्ति।[6] इति। तथाहि स्मृतिः अपि कदापि न भवेत्। यतः यः खलु अनुभवस्य कर्ता, अनुभवस्यानन्तरं तस्य विनाशो भवति। तथाहि योऽहमपश्यं सोऽहमधुना स्पृशामि इति प्रत्यभिज्ञा अपि न सम्भवति। यतः वस्तुनः क्षणिकत्वे च योऽहं सोऽहमित्यादिना एकवस्तुनिर्देशः न सम्भवति। परन्तु शरीरभिन्नात्मस्वीकारेण एते दोषाः नागच्छन्ति।

बौद्धा यद्यपि सर्वं क्षणिकमामनन्ति तथापि हेतुफलभावेन व्यवस्थितायां सन्ततौ यस्यां भावना उपजायते तस्यामेव सन्ततौ स्मृतिर्भवति। तेषां मते स्मृतिं प्रति अनुभवस्य कारणत्वं यदि स्वीक्रियते तर्हि एतदपि स्वीकरणीयं यत् अनुभवनिष्ठा काचित् शक्तिरस्ति यया शक्त्या स्मृतिः जायते। अत्र कस्यापि चेतनस्य प्रयोजनं नास्ति। तथाहि सन्तानस्वीकारादेव प्रत्यभिज्ञा अपि सम्भवति। यद्यपि सर्वं क्षणिकं तथापि कार्यकारणभावात् यथा स्मृतिः जायते तथाहि सन्तानस्वीकारादेव सर्वं सुसामञ्जस्यमिति बौद्धसिद्धान्तः। यतः यत्कायचित्तसन्तानं कर्म करोति तत्कायचित्तसन्तानं फलं लभते।[7] यतः तस्मिन् सन्ताने स्थितेषु सन्ततिषु कार्यकारणभावः विद्यते। तत्रापि केनापि चेतनेन प्रयोजनं नास्ति। यथा शालिबीजात् नालकाण्डादिरूपेण हेतुफलभावेन शाल्यङ्कुरः प्रादुर्भवति। न च तत्र चेतननिमित्तं परिलक्ष्यते। अतो हेतुफलभावनियमनुसृत्य यथा शालिवीजात् शाल्यङ्कुरस्य आविर्भावः तथा सन्ततौ एकस्मिन् क्षणे कर्म अपरस्मिन् क्षणे फलोत्पत्तिः भवति। अतः पदार्थानां क्षणिकत्वस्वीकारेऽपि न कश्चन

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

अकृताभ्युगमदोषः सम्भव इति बौद्धवादः।

अत्र वार्त्तिककारेण ताथागतसिद्धान्तः तिरस्कृत्य शाल्यादिवीजदृष्टान्तस्य असिद्धत्वं प्रतिष्ठापितम्। शाल्यादिवीजात् शाल्याद्यङ्कुरसमुत्पत्तौ बौद्धैरभिमतं खलु वीजात् अङ्कुरोत्पत्तौ मूलवीजनाशः अङ्कुरोद्गमः पृथिव्यप्तेजसां नैमित्तिकञ्च दृश्यते। सर्वाणि एतानि बीजात् अङ्कुरोत्पत्तौ सहायतां विदधति। न चात्र कश्चन: चेतन: सहायक: संलक्ष्यते बीजात् अङ्कुरोत्पत्तौ इति। तेषां मते प्राक्तनवीजं कारणम् उत्तरबीजं च फलम्। अस्मिन् स्थले अपि कर्मकरणे तथा फलोपभोगे सन्ततौ कारणमेकं फलञ्च अपरम्। मतमिदमयुक्तं, वीजावयवरूपपरमाणुनामनुवृत्तेः। तथाहि अत्र नैयायिकनयः यत् वीजावयवरूपपरमाणवः पूर्वावस्थातः उत्तरस्याम् अवस्थायां वैशिष्ट्यं किञ्चित् आदधाना अनुवृत्ता भवन्तीति। तथाहि वीजावयवरूपपरमाणवः पूर्वव्यूहं परित्याज्य व्यूहान्तरं च आपद्यन्ते। व्यूहान्तरोत्पत्तौ च पार्थिवपरमाणुः अब्धातुना संयुक्तः तथा आन्तरतेजसा पच्यमानः सन् रसमुत्पादयति। स रसो वीजस्य पूर्वावयवेन सह अङ्कुरादिभावमापद्यते। एवं वीजावयवरूपपरमाणवः पूर्वावस्थातः अवस्थान्तरे आयान्ति। अतः शाल्यादिवीजानां सम्पूर्णतया नाशाभावात् न तस्य दृष्टान्तत्वं सङ्गच्छते।

पुनरत्र विपक्षिबौद्धाः शङ्कन्ते यत् शाल्यादिवीजानां परमाण्ववस्थात्वमेव अङ्गीकार्यम्। एवं वीजावयवानां परमाण्ववस्थायां स्वीकृतायां परमाणुनां मिथविशेषणभेदाभावात् यवधान्यशाल्यादिपरमाणवः समाना एव। ननु यवधान्यशाल्यादिपरमाणुनामभिन्नत्वे कथमेतेभ्यः परमाणुभ्यो धान्यं कथं वा एतेभ्यः परमाणुभ्यः शाल्यङ्कुर इति नियमः? अत्रोच्यते कार्यकारणभावनियमाद्धि अविशेषाः केचन परमाणवः शाल्यङ्कुरमेव उत्पादयन्ति, न यवाङ्कुरम्। एवं चेतनाङ्गीकारेऽपि दृष्टस्य स्मृत्युत्पत्तिः उपपत्तिमती कार्यकारणभावादेव इति अङ्गीकार्यम्। प्रागुक्तविपक्षिपक्षोऽपि वार्त्तिककृता निराकृतः। वार्त्तिककृन्नये वीजानां परमाण्ववस्थात्वं निर्युक्तिकम्। वीजानां परमाण्ववस्थात्वे स्वीकृते सर्वदैव वीजस्य अनुपलब्धिप्रसङ्गापत्तिः दुर्वारा, न च तथा भवति लौकिकानुभवविरोधात्। अतः शाल्यादिवीजदृष्टान्तम् अत्र असिद्धमेव।

तथाहि यदि बौद्धैः स्थायी आत्मा न स्वीक्रियते तर्हि मुक्त्यर्थं तेषां कृतः प्रयासः खलु व्यर्थः। यतो जातमात्रेणैव सर्वे मुक्तिं लभेरन्। अतो यदेव अनायासेन लभ्यते तस्मिन् विषये प्रचेष्टा केनापि न करणीया।[8] अतो बौद्धानां ब्रह्मचारिव्रतपालनेनापि नास्ति किमपि प्रयोजनम्।[9] परन्तु ते बौद्धा ब्रह्मचारिव्रतं पालयन्ति। तथाहि तथागतो बुद्धो मुक्त्यर्थम् उपदेशान् प्रदत्तवान्। वार्त्तिककारेण पुनः उक्तं यद् भविष्यत्समये सुखलाभार्थमस्मिन् जगति जना अशुभकर्मानुष्ठानं परित्यज्य शुभकर्मानुष्ठानं कुर्वन्ति। यदि शरीरव्यतिरिक्तः स्थायी आत्मा न स्वीक्रियते तर्हि कर्मणः अनन्तरं तस्य शरीरस्य विनाशो भवति। अतः कदापि सुखलाभो न सम्भवः स्यात्।

पुनरत्र पुर्वपक्षिणो गदन्ति यत् यथा शरीरादभिन्नरूपेण आत्मस्वीकारेण पातकाभावरूपदोष आगच्छति तथा शरीराद्भिन्नरूपेण यदि नित्य आत्मा स्वीक्रियते तथापि अयं दोषः अर्थात् पातकाभावरूपदोष आगच्छति। अत्र पूर्वपक्षिरूपेण महर्षिणा गौतमेन उक्तं सूत्रमिदं "तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्।"[10] इति। अर्थात् नित्यात्मनः कदापि नाशो न भवति सर्वदा तस्य देहस्य नाशो भवति।

भाष्यकारेण अस्य व्यख्यायामुच्यते यदि आत्मनः नित्यत्वं स्वीक्रियते तर्हि तस्य आत्मनो विनाशः कदापि न सम्भवति। अर्थात् प्राणिहिंसाजनितं पातकमपि न स्यात् अर्थात् पातकस्य अभावोऽस्ति।[11] यतो नित्यपदार्थस्य नाशो कदापि न भवति। एवं यदि आत्मा नित्यः भवेत् तर्हि हिंसाजन्यपापस्योत्पत्तिः असम्भवः। अतः पूर्वपक्षवत् अस्मिन् पक्षेऽपि दोषो जायते। तथापि यदि कोऽपि भणति आत्मनो विनाशो भवति, तर्हि आत्मा अनित्यः।[12] अत एकस्मिन् पक्षे हिंसा भवितुं नार्हति अन्यस्मिन् पक्षे हिंसा नास्ति ।[13]

अत्र वार्त्तिककारेण उद्योतेन बौद्धस्वीकृतायाः कारिकायाः उल्लेखं कृत्वा युक्त्या तेषां मतखण्डनं क्रियते। विकारायोग्याकाशे वर्षणेन नाद्रता सम्पद्यते नाप्यातपेन शुष्कता। वर्षातपयोरार्द्रताशुष्कतारूपफलं विकारयोग्ये चर्मणि दृश्यते।[14] अर्थात् अत्र वौद्धा वक्तुमिच्छन्ति यथा आत्मनो नित्यत्वास्वीकारे पापादिफलानां कोऽपि भोक्ता नास्ति तथा आत्मनः नित्यत्वस्वीकारेऽपि पापपुण्यादिफलानामुत्पत्तिर्नास्ति। यदि आत्मनः पापपुण्यादिफलानां भोगः भवति तर्हि तस्य आत्मनः विकारः जायते। अत

आत्मा चर्मवत् अनित्यो यतो यस्य पदार्थस्य विकारोऽस्ति स पदार्थोऽनित्य:। तत्तु नैयायिका: कदापि न स्वीकुर्वन्ति। तेषां मते आत्मा आकाशवत् नित्य:। अतो वर्षातपाभ्यां यथा आकाशस्य कोऽपि विकारो न भवति तथा पापपुण्यादिभ्याम् आत्मनोऽपि विकारो नास्ति। अत आत्मनो नित्यत्वस्वीकारेऽपि हिंसा न भवति। अत: पापमपि न जायते।

अत्र वार्त्तिककारेण वौद्धमतस्य खण्डनार्थं भणितं बौद्धा यदेव अनुमानं कृतवन्तः तस्मिन् अनुमाने अनैकान्तिकदोषोऽस्ति। यतोऽत्र वर्षातपयोः सम्बन्धः स्वपक्षानित्यपदार्थवत् विपक्षनित्यपदार्थेऽपि तिष्ठति। अतोऽत्र दृष्टान्तदोषोऽप्यस्ति। तत्र तेन जिज्ञासितमिदं चर्म किमर्थमनित्यं वर्षातपसम्बन्धाद् अथवा कारणविभागाद् अथवा आश्रयविनाशाद्। उत्तरमपि तेन प्रदत्तं, अनागते विनाशकारणे भावपदार्थोऽवतिष्ठते। वर्षातपसम्बन्धकारणात् चर्म अनित्यमिति न सत्यम्। यतो वर्षातपाभ्यां सह परमाणो: सम्बन्धोऽप्यस्ति परन्तु परमाणु: नित्य:। वर्षातपाभ्यां संयोगवशात् चर्मण: सङ्कचविकाशौ भवत:। तदपि न यथार्थं, यतोऽत्र सङ्कोचविकाशौ इति पदस्य अर्थप्रसङ्गे विकल्पद्वयमागच्छति तद्यथा सङ्कोचविकाशौ इति पदस्यार्थः अल्पमहत्वे अथवा संयोगविभागौ। तत्र प्रथमपक्षे एकस्मिन् पदार्थे परिमाणद्वयस्यावस्थानं न सम्भवति परिमाणस्य यावद्द्रव्यभावित्वात्। तत्र द्वितीयपक्षे एकत्ववशात् चर्मण: संयोगविभागौ न भवत:। चर्म एकमवयविस्वरूपं तस्मिन् अवयविनि विकारो न सम्भवति, परन्तु तस्मिन् अवयविनि ये खलु अवयवा: सन्ति, ते अवयवा विकृताः भवन्ति। अतोऽत्र दृष्टान्तदोषो विद्यमान:। तथा च बौद्धा यदि एवं वदन्ति, विक्रिया खलु पदार्थान्तरोऽत्पादो यथा घटादिपदार्थानां पूर्वरूपनिवृत्तौ रूपान्तरस्योत्पत्तिर्भवति। अतो घटादिपदार्थानां विकारोऽस्ति। तादृशविकारा आत्मनि अपि परिलक्ष्यन्ते। आत्मन: सुखस्य निवृत्तौ दुःखस्य प्रादुर्भावो भवतीति। अतो नित्यात्मन: सुखदु:खादीनां भोग: सम्भवति।

अत एकस्मिन् पक्षे हिंसा भवितुं नार्हति अन्यस्मिन् पक्षे हिंसा नास्ति पूर्वपक्षिणामस्य संशयस्य निराकरणार्थं महर्षिणा उक्तं सूत्रमिदं "न कार्याश्रयकर्तृबधात् इति।"[15] अत्र न इत्यस्यार्थो भवति नित्यात्मन: स्वीकारेण पापस्य अभावो न भवति। यत: कार्याश्रयस्य देहादिसंघातस्य वा हिंसा भवति। अत्र भाष्यकारेण उक्तं हिंसाशब्देन अत्र न तु आत्मबधो बोध्य: परन्तु आत्मन: कार्याश्रयरूपेण देहेन्द्रियसंघातविशेषस्य पीड़ैव बोध्या।[16] अत्र प्राणिहिंसाशब्देन तु साक्षात्सम्बन्धेन आत्मविनाशो न बोध्य:। यत आत्मा अनुच्छित्तिधर्मविशिष्टः अर्थात् आत्मन: विनाशो न भवति। जन्मशब्देन अभिनवदेहेन्द्रियै: सह आत्मन: सम्बन्धवत् मरणशब्देन देहेन्द्रियै: सह आत्मन: सम्बन्धनाशो बोध्यते। अतो हिंसाशब्देन देहेन्द्रियादीनां विनाशो पीड़ा वा बोध्यते। अत: एवं रूपेण हिंसा भवति तथा हिंसाजन्यपापम् अपि उत्पद्यते। भाष्यकारो बधशब्देन उपघातः वैकल्यं तथा प्रमापणमिति शब्दत्रयस्य ग्रहणं कृतवान्।[17] यद्यपि सुखदु:खादीनां साक्षात्सम्बन्धेन आश्रय: खलु आत्मा तथापि अयमात्मा शरीरादृते किमपि भोक्तुं न शक्नोति अत: शरीरमेव आत्मनो भोगायतनम्। अत्र कार्यशब्देन सुखदु:खादि एव गृह्यते, तथा तेषामाश्रयरूपेण शरीरमेव बोध्यम्। तदर्थं शरीरस्य हिंसैव आत्महिंसारूपेण परिगण्यते। अत्र महर्षिणा गौतमेन कार्याश्रयपदेन शरीरस्य ग्रहणं कृतम्। परन्तु अत्र भाष्यकारेण कार्याश्रयपदेन देहादिसंघातस्य ग्रहणं कृतम्। कार्याश्रयकर्त्तृपदे तेन कर्मधारयसमासस्य ग्रहणं कृत्वा देहेन्द्रियादिसंघातरूपार्थः कृतः। यतो देहेन्द्रियादिसंघातद्वारा सुखदु:खादीनामनुभवो भवति। अत: सुखदु:खादि-रूपकार्यस्य आश्रय: खलु देहेन्द्रियादिसंघात:।[18] तेषां बधः अत्र हिंसापदेन गृह्यते, यत आत्मनो विनाशो नास्ति तस्य नित्यत्वात्।[19] प्रलयकाले आत्मा तिष्ठति परन्तु तस्य देहेन्द्रियादिसंघातस्य अभावे सुखदु:खस्य भोगः न भवति। अतः देहेन्द्रियादिसंघातः गौणरूपेण कर्त्तृपदेन गृह्यते। अस्मिन् प्रकरणे महर्षिणा गौतमेन सूत्रत्रयेण देहात्माभिन्नत्वस्य खण्डनं कृतम्। अपि च अत्र तेन देहेन्द्रियादिव्यतिरिक्तरूपेण आत्मनः अस्तित्वं प्रतिस्थापितम्। भाष्यकारेणापि अत्र विभिन्नयुक्तिमाध्यमेन देहादिसंघातव्यतिरिक्तस्य आत्मन: अस्तित्वं प्रतिस्थापितम्।

अत्रापि वार्त्तिककारेण प्रायेण भाष्यकारानुसारं व्याख्या कृत्वा अपि कथ्यते येषां मते स्थायी आत्मा नास्ति तथाहि येषां नये सर्वं वस्तुजातं क्षणिकं तेषां पक्षे हिंसा न सम्भवति।[20] यत: तत्र कृतस्य नाशो भवति तथाहि अकृतस्य भोगो भवति। नैयायिका वदन्ति अयमात्मा शरीरादिमाध्यमेन कर्म करोति तथा हि शरीरादिद्वारा फलं भुनक्ति। अतो य आत्मा कर्म करोति स एव फलं भुनक्ति अतो नास्ति कृतप्रनाशादिदोष:।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

**उपसंहारः**— अत्रेदं वक्तव्यं यत् वात्स्यायनः साक्षात् गौतमसूत्राणि व्याख्यायामास, वार्त्तिककारस्तु भाष्यवचनानि सविशदं वर्णयामास। गौतमसूत्रमाश्रित्य प्रवर्त्तितयोः भाष्यवार्त्तिकयोः सत्यपि सादृश्ये क्वचित् क्वचित् वैसादृश्यमपि सुलभम्। किञ्च इदमपि समीक्ष्यते यत् बहुषु स्थलेषु वार्त्तिककृता स्वातन्त्रमतोपस्थापनेन स्वविशेषवैशिष्ट्यं प्रकाशितम् । एवं समीक्षणेन आविष्कृता वार्त्तिककृत्विशेषा यथामति अत्र उपस्थाप्यते।

"शरीरदाहे पातकाभावात्।"[21] इत्यस्य गौतमसूत्रस्य व्याखाप्रसङ्गे भाष्यकारेण सूत्रे यदेव अस्ति तेषां सम्यग् व्याख्या कृता। सः अत्र बौद्धसिद्धान्तस्य खण्डनं सूत्रानुसारेण कृतवान्। वार्त्तिककारः भाष्यकारस्य समर्थनं कृत्वा अपि पुनः नानाविधाशङ्काम् उल्लिख्य तेषां खण्डनं कृतवान्।

**शरीरस्यात्मत्वे स्मृत्यनुपपत्तिः**

यदि शरीरमेव आत्मा भवेत् अर्थात् यदि शरीरव्यतिरिक्तः कोऽपि नित्य आत्मा न तिष्ठति, तर्हि स्मृतिः कदापि न भवति यतो यः खलु अनुभवस्य कर्ता अनुभवस्यानन्तरं तस्य विनाशो भवति अतः स्मृतिः न भवति। तथाहि योऽहमपश्यं सोऽहमधुना स्पृशामि इति प्रत्यभिज्ञा अपि न सम्भवति। योऽहं सोऽहमित्यादिना एकवस्तुनिर्देशः न सम्भवति क्षणिकत्वात्। परन्तु शरीराद्भिन्नरूपेण यदि आत्मा विद्यते तर्हि एते दोषा न आगच्छन्ति।

**आत्मनः क्षणिकत्वेऽपि स्मृत्युपपन्ना उपस्थापितेऽनुमाने दोषप्रदर्शनम्**

वार्त्तिककारेण अत्र क्षणिकवादिबौद्धसिद्धान्तानां खण्डनम् उदाहरणसहयोगेन कृतम्। यथा शालिवीजात् अङ्कुरोत्पत्तौ न च तत्र चेतननिमित्तं परिलक्ष्यते। हेतुफलभावनियमनुसृत्य यथा शालिवीजात् शाल्यङ्कुरस्य आविर्भावः तथा सन्ततौ एकस्मिन् क्षणे कर्म अपरस्मिन् क्षणे फलोत्पत्तिः भवति। अतः पदार्थानां क्षणिकत्वस्वीकारेऽपि न कश्चन अकृताभ्युगमदोषः सम्भवः इति बौद्धवादः। अत्र वार्त्तिककारेण भणितं शाल्यादिवीजानां सम्पूर्णतया नाशाभावात् न तस्य दृष्टान्तत्वं सङ्गच्छते।

**पीलुपाकवादखण्डनम्**

वीजावयवानां परमाण्ववस्थायाः अस्वीकाराण तेन न केवलं बौद्धानाम् अपि तु वैशेषिकस्वीकृतपीलुपाकवादस्य खण्डनं क्रियते।[22] यतः घटादिद्रव्यानां पाकसमये सर्वदा उपलब्धिः भवति।

**शरीरव्यतिरिक्तात्मनः अस्वीकारे सुखाद्यनुभवो न सम्भवः**

तथा च तेन पुनरुक्तं यद् भविष्यत्समये सुखलाभार्थमस्मिन् जगति जना अशुभकर्माणुष्ठानं परित्यज्य शुभकर्मानुष्ठानं कुर्वन्ति। यदि शरीरव्यतिरिक्तः स्थायी आत्मा न स्वीक्रियते तर्हि कर्मणः अनन्तरं शरीरस्य विनाशे कदापि सुखलाभो न सम्भवः स्यात्।[23]

"तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्" अस्य सूत्रस्य व्यख्यायां भाष्यकारः सूत्रकारानुसारं केवलं पूर्वपक्षिमतस्योल्लेखं कृतवान् परन्तु वार्त्तिककारेण बौद्धस्वीकृतायाः कारिकायाः खण्डनं कृत्वा तेषां मतमपि सम्यग्रूपेण खण्डनं कृतम्।

**सांख्यमतेऽपि हिंसा न सम्भवः**

अस्य सूत्रस्य व्याख्यायां वार्त्तिककारेण प्रागेव सांख्यमते हिंसा भवितुमर्हति वा इति आशङ्कां कृत्वा तस्य खण्डनमपि कृतम्। सांख्यमते सुखादिगुणः नित्यबुद्धौ तिष्ठति। अतः आत्मनः नित्यत्ववशात् यदि हिंसा न सम्भवति तर्हि बुद्धिविषयेऽपि एकः नियमः।

**बौद्धमते अनैकान्तिकदोषाविष्कारः**

बौद्धाः आत्मनः अनित्यत्वप्रतिष्ठायां यदेव अनुमानं कृतवन्तः तस्मिन् अनुमाने अनैकान्तिकदोषः अस्ति। यतः वर्षातपयोः सम्बन्धः यथा अनित्यचर्मणि अस्ति तथैव नित्यपरमाणुपदार्थेऽपि तिष्ठति। तथा च अस्मिन् अनुमाने दृष्टान्तदोषोऽप्यस्ति।[24] तथा च यावत्पर्यन्तं भावपदार्थस्य विनाशकारणं न आगच्छति तावत्पर्यन्तं भावपदार्थः अवतिष्ठते।

**अवयवित्वाद् चर्मणि विकारः नास्ति**

वर्षातपाभ्यां सह परमाणोः सम्बन्धोऽस्ति परन्तु परमाणुः नित्यः। तर्हि वर्षातपाभ्यां संयोगवशात् चर्मणः सङ्कचविकाशौ

भवत:। तदपि न यथार्थं, यतोऽत्र सङ्कोचविकाशौ इति शब्दस्य अर्थप्रसङ्गे विकल्पद्वयं प्राप्यते तद्यथा अल्पमहत्वौ अथवा संयोगविभागौ। तत्र प्रथमपक्षे एकस्मिन् पदार्थे परिमाणद्वयस्य अवस्थानं न सम्भवति परिमाणस्य यावद्द्रव्यभावित्वात्। द्वितीयपक्षे च चर्मण एकत्ववशात् संयोगविभागौ न भवत:। चर्म एकमवयविस्वरूपं तस्मिन् अवयविनि विकारो न सम्भवति, परन्तु तस्मिन् अवयविनि ये खलु अवयवा: सन्ति, ते अवयवा विकृता भवन्ति। अतोऽत्र दृष्टान्तदोषोऽपि विद्यमान:।

**आत्मनि विकारस्य आशङ्का**

यदि कोऽपि एवं वदेत् विक्रिया नाम पदार्थान्तरस्योत्पत्तिः, यथा घटादिपदार्थानां पूर्वरूपनिवृत्तौ रूपान्तरस्योत्पत्तिर्भवति। अतो घटादिपदार्थानां विकारोऽस्ति। तर्हि तादृशविकारा आत्मनि अपि परिलक्ष्यन्ते। तस्य आत्मन: सुखस्य निवृत्तौ दुखस्य प्रादुर्भावः भवतीति। अतो नित्यात्मन: सुखदु:खादीनां भोग: सम्भवति।

**कर्तृत्वभोक्तृत्वयोः व्याख्या**

वार्तिककारेण "न कार्याश्रयकर्तृबधात् इति।"[25] अस्य सूत्रस्य व्याख्यायामुक्तं कर्तृत्वपदस्यार्थः खलु ज्ञानचिकीर्षाप्रयत्नानां समवायः। तथा भोक्तृत्वपदस्यार्थः खलु सुखदु:खसंवित्समवायः। यद्यपि एतानि शरीरे न तिष्ठन्ति तथापि शरीरस्य निमित्तवशात् शरीरमेव कर्ता।

## Endnotes

1. "चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमय:"(तै.उ.२।१।१) इत्यादिश्रुते:, प्रदीप्तगृहात् स्वपुत्रं परित्यज्य अपि स्वस्य निर्गमदर्शनात्, "स्थूल: अहम्, कृश: अहम्" इत्याद्यनुभवात् च स्थूलशरीरमात्मा इति वदति।" वे.सा. सम्पा. विपदभञ्जनपाल: ,पृ १६६
2. न्या. सू३/१/४
3. "शरीरश्ब्दग्रहणेन देहेन्द्रियबुद्धिवेदनासंघात: प्राणिभूते गृह्यते।" वा. भा. ३/१/४ सम्पा. अनन्तलालठाकुर: पृ. १३८
4. "तत्फलेन कर्त्तुरसम्बन्धात् अकर्त्तुश्च सम्बन्धात्।" वा. भा. ३/१/४ सम्पा. अनन्तलालठाकुर: पृ. १३८
5. बौ. द. सर्वदर्शनसंग्रह: सम्पा. अमितभट्टाचार्य: पृ.३६
6. "शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासंघात: प्राणिभूतो गृह्यते। शरीरं प्राणिभूतं दहत: प्राणिहिंसाकृतं पापं पातकमितुच्यते, तस्याभाव: अकर्त्तु: फलेन सम्बन्ध: कर्त्तुश्चानभिसम्बन्ध इति। कस्मात्? अनभ्युपगतार्थान्तरात्मनोऽन्य: शरीरेन्द्रियबुद्धिवेदना-संघात: कर्त्ता अन्यश्च तत्फलस्य भोक्तेति। तदेवम् अकृतकृताभ्यागमनाश-दोषप्रसङ्ग: अनिष्टश्च। तम्सात् कर्त्ता भोक्ता च य: स आत्मेति।" न्या. वा. ३/१/४ सम्पा. अनन्तलालठाकुर: पृ. ३३०-३३१
7. "यस्मिन्नेव हि सन्ताने आहिता कर्मवासना। फलं तत्रैव बध्नाति कार्पासे रक्तता य्रथा।।" स.द.सं. आर्हतदर्शनम्।
8. "मुक्त्यर्थश्च प्रयासो नोपपद्यते, अयत्नसिद्धत्वात्।" न्या. वा. ३/१/४ सम्पा. अनन्तलालठाकुर: पृ. -३३३
9. "जातमात्र एवायं मुच्यत इति मुक्त्यर्थो ब्रह्मचर्यवासो व्यर्थः।" न्या. वा. ३/१/४ सम्पा. अनन्तलालठाकुर: पृ. -३३३
10. न्या. सू-३/१/५
11. "यस्यापि नित्योनात्मना सात्मकं शरीरं दह्यते, तस्यापि शरीरदाहे पातकं न भवद्द्ग्धु:।"वा. भा. ३/१/५ सम्पा. अनन्तलालठाकुर: पृ. १३८
12. "अथ हिंस्यते? नित्यत्वमस्य न सम्भवति।"वा. भा. सम्पा. अनन्तलालठाकुर: पृ. १३८
13. "सेयमेकस्मिन् पक्षे हिंसा निष्फला, अन्यस्मिंस्त्वनु-पपन्नेति।"न्या. भा. सम्पा. अनन्तलालठाकुर: पृ. १३८
14. "वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोर्भयम्। चर्मकर्मणश्चेत सोऽनित्य खतुल्यश्चेदसद्फल इति॥"न्या.वा. ३/१/५ सम्पा. अनन्तलालठाकुर: पृ. ३३४
15. न्या. सू.-३/१/६
16. "न ब्रुमो नित्यस्य सत्त्वस्य बधो हिंसा, अपि तु त्वनुच्छित्तिधर्मकस्य सत्त्वस्य कार्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्त्तृणामिन्द्रियाणामुपघात: पीडा, वैकल्यलक्षण: प्रबन्धोच्छेदो वा प्रमापणलक्षणो वा बधो हिंसेति"वा. भा. ३/१/६ सम्पा. अनन्तलालठाकुर: पृ. १३९
17. "पीड़ा, वैकल्यलक्षण: पबन्धोच्छेदो वा प्रमापणलक्षणो बधो हिंसेति"वा. भा. सम्पा. अनन्तलालठाकुर: पृ. १३९

18. "कार्य्याश्रयकर्त्तृबध इति कार्य्याश्रयो देहेन्द्रियबुद्धि-संघातो नित्यस्यात्मनः तत्र सुखदुःखप्रतिसंवेदनं तस्यानिष्ठानमाश्रयः, तदायतनं, न ततोऽन्यदिति स एव कर्त्ता। "वा. भा. ३/१/६ सम्पा. अनन्तलालठाकुरः पृ. १३९
19. "तस्य बध उपघातः पीडा, प्रमापणं हिंसा, न नित्यत्वेनात्मोच्छेदः"। वा. भा. सम्पा. अनन्तलालठाकुरः पृ. १३९
20. यस्य तावत् प्रतिक्षणविनाशिनः संस्कारास्तस्य किं हिंस्यते निर्हेतुकत्वात्। न्या. वा. सम्पा. अनन्तलालठाकुरः पृ. ३३७
21. न्या. सू३/१/४
22. "एतेन घटादिपाको व्याख्यातः। नापरमाण्वन्तो विभागः सर्वावस्थोपलब्धेरिति।" न्या. वा. सम्पा. अनन्तलालठाकुरः पृ. ३३३ न्या. सू३/१/४
23. "यस्य पुनः प्रतिक्षणप्रध्वंसिनः संस्काराः तस्य सुखसाधनसंबन्धानुस्मृतेरभावात् सुखी स्यामिति क्रियानुपपत्तिः।" न्या. वा. सम्पा. अनन्तलालठाकुरः पृ. ३३३ न्या. सू३/१/४
24. "वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोर्भयम्। चर्मकर्मणश्चेत सोऽनित्य खतुल्यश्चेदसद्फल इति॥"न्या.वा. ३/१/५ सम्पा. अनन्तलालठाकुरः पृ. ३३४
25. न्या. सू.-३/१/६

## Bibliography


- गौतमः, न्यायदर्शनम्, सम्पा. तारानाथन्यायतर्कतीर्थः, नई दिल्ली: मुंशिराम मनोहरलाल पावलिशार्स,२००३।
- गौतमः, न्यायदर्शनम्(तृतीयखण्डम्), अनुवादकः व्याख्याता च फणिभूषणतर्कवागीशः, कलकाता: पश्चिमवङ्गराज्य पुस्तक पर्षद्,२००० (द्वितीयमुद्रणम्)।
- गौतमः, न्यायदर्शनम्, हिन्दीव्याख्याकार: सम्पादकश्च. चित्तनारायणपाठकः, वाराणसी: चौखाम्वाविद्याभवन, २०१२(प्रथमसंस्करणम्)
- भट्टाचार्यः, अमरेन्द्रमोहनः, न्यायप्रवेशः, कलकाता: संस्कृतपुस्तकभाण्डार, २००१।
- भारद्वाजः, न्यायभाष्यवार्त्तिकम्, सम्पा. अनन्तलालठाकुरः, नईदिल्ली: भारतीयदार्शनिकानुसंधानपरिषत्, १९९७।
- माधवाचार्यः, सर्वदर्शनसंग्रहः(चार्वाक-बौद्ध-जैनदर्शनानि), सम्पा. अमितभट्टाचार्यः, कलकाता: संस्कृतपुस्तक-भाण्डार, २०१३।
- माधवाचार्यः, सर्वदर्शनसंग्रहः, व्याख्याकार: सम्पादकश्च उमाशङ्करशर्मा, वाराणसी: चौखाम्वाविद्याभवन, १९६४।
- वाचस्पतिमिश्रः, न्यायवार्त्तिकतात्पर्यटीका, सम्पा. अनन्तलालठाकुरः, नई दिल्ली: भारतीयदार्शनिकानुसंधान-परिषत्, १९९७।
- वात्स्यायनः, न्यायभाष्यम्, सम्पा. अनन्तलालठाकुरः, नई दिल्ली: भारतीयदार्शनिकानुसंधानपरिषत्, १९९७।


———